# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## द्वितीया परीक्षा (नूतनपुस्तकाधारिता)

दिनाङ्कः – 28-08-2022 　　　　　　　　　　　　　　　　　　　　अङ्काः – १००

पूर्वाह्णः – १०:००तः १२:३०पर्यन्तम् 　　　　　　　　　　　　　　समयः – सार्धद्विहोराः

ಸೂಚನೆಗಳು: ೧. ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆಯುವ ಉತ್ತರಗಳು ದೇವನಾಗರೀಲಿಪಿಯಲ್ಲೇ ಇರಬೇಕು.
೨. ಪ್ರಶ್ನೆಗಳ ಕ್ರಮಾಂಕಗಳನ್ನು ತಪ್ಪದೇ ಬರೆಯಿರಿ.

**Instructions: 1. Write the Samskrita answers in Devanaagari script only.**
**2. Write the question numbers correctly.**

1. षण्णाम् एकवाक्येन उत्तरं लिखत। 　　　　　　　　　　6

   1. चन्द्रस्य कला कदा न दृश्यते गगने ? 　2. पञ्चगव्ये किं किं भवति ?
   3. काभ्यां सह रामः वनम् अगच्छत् ? 　4. अधिकारमदः धनमदः च कं मार्गभ्रष्टं करोति ?
   5. सविता कदा रक्तः भवति ? 　6. व्यासस्य मातापितरौ कौ ?
   7. उपमन्युः कस्य शिष्यः ? 　8. देवीभागवते तुलसी केन नाम्ना वर्णितास्ति ?

2. त्रयाणां वाक्यद्वयेन वा त्रयेण वा उत्तरं लिखत। 　　　　　　　　　　6

   1. सुकृते दुष्कृते च चत्वारः समभागिनः - अत्र चत्वारः जनाः के ?
   2. कथं वृक्षाः सत्पुरुषाः इव सन्ति ?
   3. नदीनां विषये लिखत ।
   4. पण्डितः पुत्रान् आहूय किमवदत् ?
   5. व्यासेन रचिताः ग्रन्थाः के ?

3. किञ्चित् विषयद्वयम् अधिकृत्य त्रीणि त्रीणि वाक्यानि संस्कृतेन लिखत। 　　　　　　6

   1. ध्रुवः 　　2. कुचेलः 　　3. उपमन्युः

4. श्लोकं पूरयित्वा अर्थं कन्नडभाषया आङ्ग्लभाषया वा लिखत । 　　　　　　4x2=8

   1. छायामन्यस्य..................... । .................. सत्पुरुषा इव ॥
   2. सम्पूर्णकुम्भो ......................। ................... बहुजल्पयन्ति ॥

5. ससन्दर्भं संस्कृतभाषया विवृणुत । 3x2= 6

1. "अहम् अस्मिन् कूपे अपतम्" ।

1. कःपाठः ? 2. कः पतति ? 3. कं प्रति वदति ?

2. "मम पुत्रः एव नृपतेः अङ्कम् आरोढुम् अर्हति" ।

1. कः पाठः? 2. का अवदत् ? 3. कम् अवदत् ?

3. "एषा वृत्तिः नोचिता" ।

1. कः पाठः ? 2. कः वदति ? 3. कं प्रति वदति ?

6. लोकोक्तीनाम् अर्थं कन्नडभाषया आङ्ग्लभाषया वा विवृणुत । 3x2=6

1. नास्ति धान्यसमो ह्यर्थः। 2. अर्थस्य पुरुषो दासः ।

3. न पुष्पार्थी सिञ्चति शुष्कवृक्षम् ।

7. चतुर्थपदं लिखत । 1x4=4

1. देवम् – देवान् :: आचार्यम् ...... 2. लिख् – लिखित्वा:: पठ् ..........

3. शम्भुः – शम्भुभिः :: गुरुः .......... 4. व्यासः – पराशरः :: वासुदेवः ......

8. अन्यलिङ्गे परिवर्तयत । 3

1. राजा 2. पुत्रः 3. भीता

9. रिक्तस्थानानि कोष्टकदत्तशब्दस्य उचितैः विभक्तिरूपैः पूरयत । 1x5=5

1. .................परितः भूमिः भ्रमति। (सूर्य)

2. अहं................. सह आगच्छामि। (युष्मद्)

3. .................नमः। (शारदा)

4. रामः .............स्पृहयति। (भक्त)

5. .............. अन्तः तडागः अस्ति। (वन)

10. एतेषां धातु-लकार-पुरुष-वचनानि लिखत (चतुर्णाम् एव) 1x4=4

1. लभन्ते 2. नम 3. अवदन्

4. निवसामि 5. अपाहरः

11. संवत्सराणां नामानि लिखत । 2x2=4

1. प्रभवो ..........................। ...................................धातुस्तथेश्वरः॥

2. बहुधान्यः ..........................। ................................... पार्थिवो व्ययः॥

12. वन्द् धातोः, दा धातोः वा रूपाणि लट्-लकारे पुरुषत्रये वचनत्रये च लिखत 3

13. रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत । (पञ्चानाम् एव) 1x5=5

1. अहं मम अग्रजायाः गृहम् अगच्छम्।
2. कृष्णः भक्तं पश्यति।
3. व्यासमुनिः श्रीमन्नारायणस्य अंशेन अवातरत्।
4. सन्तुष्टः भवान् ध्रुवाय ध्रुवपदं प्रायच्छत्।
5. विमातुः वचनेन मनः कलुषितम्।
6. अगस्त्यः लोपामुद्रां वृणोति।

14. एतेषां पर्यायपदानि लिखत। 1x3=3

1. पत्राणि 2. सविता 3. पुनः

15. एतेषां विरुद्धार्थकानि पदानि लिखत। 1x3=3

1. छाया 2. वामः 3. अर्हाः

16. अधः प्रदत्तपदानां सन्धिं विभज्य सन्धिनाम लिखत। (पञ्चानाम् एव) 1x5=5

1. परोपकारः 2. कोऽत्र 3. अधुनापि
4. अभीष्टम् 5. वसन्तर्तुः 6. तत्रैव

17. वाक्ये योजयत । (पञ्चानाम् एव) 1x5=5

1. क्रीडितुम् 2. इदानीम् 3. दृष्ट्वा
4. पुरतः 5. गच्छ 6. उक्त्वा

**18. अधोलिखितानां पदानाम् अन्तं, लिङ्गं, विभक्तिं, वचनं च लिखत (पञ्चानाम् एव) 1x5=5**

| | | |
|---|---|---|
| **1. पितुः** | **2. रात्रौ** | **3. महर्षिः** |
| **4. गाः** | **5. श्रीरामस्य** | **6. मातॄणाम्** |

**19. क्त्वा अथवा ल्यप् प्रत्ययेन वाक्यानि योजयत । 1x3=3**

**1. पुत्रः शालां गच्छति । पुत्रः वेदं पठति ।**

**2. माता पुत्रं पश्यति । सा तस्मै नवनीतं ददाति ।**

**3. जनाः सूर्यं विलोकयन्ति। तं प्रणमन्ति ।**

**20. कर्णाटकभाषया आङ्ग्लभाषया वा अनुवदत । 1x5=5**

**1. बिडालः कांश्चित् मूषकान् अमारयत्।** **2. केचित् बालकाः तत्र तिष्ठन्ति।**

**3. रमा गाम् आनयति।** **4. अलं सम्भाषणेन, तूष्णीम् उपविशत।**

**5. आसनं विना अतिथिः कथम् उपविशति ?**

**21. संस्कृतभाषया अनुवदत । 1x5=5**

**1. Boys are playing in the playground.** **ಹುಡುಗರು ಕ್ರೀಡಾಂಗಣದಲ್ಲಿ ಆಡುತ್ತಿದ್ದಾರೆ.** [illegible]

**2. There is a park near my house.** **ನನ್ನ ಮನೆಯ ಹತ್ತಿರ ಉದ್ಯಾನವಿದೆ.**

**3. The king Nala sat on the throne.** **ನಳಮಹಾರಾಜನು ಸಿಂಹಾಸನದಲ್ಲಿ ಕುಳಿತುಕೊಂಡನು.**

**4. Salutations to Sita and Rama.** **ಸೀತಾರಾಮರಿಬ್ಬರಿಗೆ ನಮಸ್ಕಾರ.**

**5. Let the people worship God.** **ಜನರು ದೇವರನ್ನು ಪೂಜಿಸಲಿ.**

--------------------